आकाशवाणी

दिनाङ्क :- 13.05.2025 सायम् :- 06:20

**मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी **सिन्दूराभियानानन्तरं अद्य पञ्जाबप्रान्तस्य उधमपुरवायुसेनास्थानकस्य यात्रावधौ वीरैः धीरैः सैनिकैः सह संवादावधौ उक्तवान् भारतं सदैव अस्य सैन्यस्य आभारभारभरितं स्थास्यति।**
- **रक्षामन्त्री राजनाथसिंहः अद्य नवदिल्ल्याम् एकस्मिन् उच्चस्तरीये उपवेशने भारतस्य पश्चिमसीम्नः सुरक्षास्थितेः समीक्षां कृतवान्।**
- जम्मू-कश्मीरस्य शोपिया-जनपदस्य शुकरू-केलर-वनक्षेत्रे सुरक्षाबलैः सह जाते संघर्षे त्रयः आतङ्किनः कालग्रासभूताः।
- पंजाबस्य अमृतसरजनपदे मजीथा-क्षेत्रे कथितरूपेण विकृतमदिरायाः सेवनेन एकविंशति-जनाः मृत्युमुपगताः षट् जनाः च चिकित्सालये उपचाररताः सन्ति।
- केंद्रीय-माध्यमिक-शिक्षणसंस्थानेन अद्य दशमकक्षायाः द्वादशकक्षायाः च परीक्षापरिणामः समुद्घोषितः।

**प्रधानमन्त्रिणः आदमपुरयात्रा**

प्रधानमन्त्री नरेन्द्रमोदी एकं दृढं सन्देशं प्रदत्तवान् यत् पाकिस्ताने एतादृशं एकमपि स्थानं न अवशिष्टं यत्र आतङ्किनः शान्त्या श्वासमपि ग्रहीतुं शक्नुयुः। भारतम् आतङ्ककेन्द्राणि सटीकतया नष्टीकर्तुं पूर्णतया समर्थम् अस्ति। प्रधानमन्त्री अमुं सन्देशं पञ्जाबप्रान्तस्य आदमपुरवायुसेनास्थानके वीरैः धीरैः सैनिकैः सह संवादावधौ प्रदत्तवान्। तेन सैन्यस्य साहसं सिन्दूराभियानावधौ देशरक्षार्थं भूरिशः प्रशंसितम्। सिन्दूराभियानस्य साफल्यविषये श्रीमोदी उक्तवान् यत् अस्य अभियानस्य अन्तर्गतं न केवलम् आतङ्ककेन्द्राणि नष्टीकृतानि अपितु शताधिकाः आतङ्किनः अपि निहताः प्रधानमन्त्रिणा उक्तं यत् प्रत्येकं सैनिकस्य केवलं 'भारत माता की जय' इति जयघोषमेव संकल्पः अस्ति यः हि देशाय आत्मबलिदानं कर्तुं सर्वथा सिद्धः तिष्ठति। तेनोक्तं यत् एषः प्रत्येकं नागरिकस्य स्वरः यः हि स्वदेशार्थमेव जीवितुम् इच्छति तथा च किमपि कर्तुं वाञ्छति। भारतस्य आयुधैः स्वलक्ष्याणां विभेदनं सटीकतया केवलं पञ्चविंशनिमेषाभ्यन्तरे एव कृतम्।

**रक्षामन्त्रिणः सम्मेलनम्**

रक्षामन्त्री राजनाथसिंहः अद्य नवदिल्ल्याम् एकस्मिन् उच्चस्तरीये उपवेशने भारतस्य पश्चिमसीम्नः सुरक्षास्थितेः समीक्षां कृतवान्। उपवेशने अस्मिन् रक्षाप्रमुखः श्री-अनिलचौहानः नौसैन्यप्रमुखः एड्मिरल् दिनेशके त्रिपाठी सैन्यप्रमुखः उपेन्द्रद्विवेदी तथा च वायुसैन्योपप्रमुखः एयर् मार्शल् नर्मदेश्वरतिवारी च सहभागितां कृतवन्तः।

**जम्मू-कश्मीर-गोलिकाप्रहारः**

जम्मू-कश्मीरस्य शोपिया-जनपदस्य शुकरू-केलर-वनक्षेत्रे सुरक्षाबलैः सह जाते संघर्षे त्रयो आतंकिनः कालग्रासभूताः। कश्मीरजनपदस्य आरक्षिमहानिदेशकः वी.के.बिरदी इत्यसौ आकाशवाण्या सह जातायां वार्तायाम् अकथयत् यत् मारिताः त्रयः आतंकिनः सम्भवतः लश्कर-ए-तैयबा इत्यातंकिगुल्मस्य , द-रेजिस्टेंस-फ्रंट-संघटनस्य च सदस्याः आसन्। मृतानाम् आतंकिनाम् अभिज्ञानाय प्रयासः क्रियते। इतः पूर्वं , सुरक्षाबलैः आतंकिनाम् अन्वेषणाय क्षेत्रे अन्वेषणाभियानं प्रचालितम् अभियानावधौ च, आतंकवादिभिः भीषणगोलिकाप्रहारः विहितः यस्य प्रत्युत्तरे त्रयो आतंकिनः मारिताः सन्ति।

**पञ्जाब-मदिरा**

पंजाबस्य अमृतसरजनपदे मजीथा-क्षेत्रे कथितरूपेण विकृतमदिरायाः सेवनेन एकविंशतिजनाः मृत्युमुपगताः षट् जनाः च चिकित्सालये उपचाररताः सन्ति। मुख्यमन्त्री भगवन्तमानः पीडितानां परिवारान् अमिलत् आश्वासनं च प्रायच्छत् यत् घटनायै उत्तरदायिनः आरोपिणः अवश्यमेव दण्ड्यन्ते। अस्मिन् घटनाप्रकरणे द्वौ अधिकारिणौ, एकः आरक्ष्युपाधीक्षकः, आरक्षिकेन्द्राधिकारी च निलम्बिताः अभवन्। अमृतसरजनपदस्य उपायुक्ता साक्षीसाहनी इत्येषा अकथयत् यत् एषा घटना दुर्भाग्यपूर्णा वर्तते। तया आश्वासितं यत् सर्वकारेण यथासंभवं सहाय्यप्रदानं क्रियते। सा उक्तवती यत् आरोपिणः आपूर्तिकर्तारः निगडिताः सन्ति, घटनायाः अस्याः अन्वीक्षणं च प्रवर्तते।

**CBSE-12TH RESULT:**

केंद्रीय-माध्यमिक-शिक्षणसंस्थानेन अद्य दशमकक्षायाः द्वादशकक्षायाः च परीक्षापरिणामः समुद्घोषितः अस्ति। द्वादशकक्षायाम् अस्मिन् वर्षे चतुर्नवत्युत्तर-सप्तशताधिक-द्विनवतिसहस्रोत्तर-षोडशलक्ष-छात्राः परीक्षायै उपस्थिताः आसन्। एतेषु अष्टाशीति-दशमलव-नवत्रिंशत्प्रतिशतं छात्राः समुत्तीर्णाः अभवन् , येन विगतवर्षस्य तुलनायां शून्य-दशमलव-एकचत्वारिंशत्प्रतिशतम् अंकानां वृद्धिः द्योतते। छात्रैः तुल्यं छात्राभिः उत्तमप्रदर्शनं विहितमस्ति यासु एकनवतिप्रतिशततः अधिकाः छात्राः उत्तीर्णाः अभवन्। केंद्रीय-माध्यमिक-शिक्षणसंस्थानस्य परीक्षानियंत्रकः संयमभारद्वाजः आकाशवाण्या सह वार्तां कुर्वन् अकथयत् यत् अस्य वर्षस्य द्वादशकक्षायाः परीक्षायां शतप्रतिशतं किन्नर-छात्राः उत्तीर्णाः अभवन्।

## केन्द्रीयमाध्यमिकशिक्षापरिषदः-दशमकक्षापरिणामः

केन्द्रीयमाध्यमिकशिक्षापरिषदः दशमकक्षायाः परीक्षायां नवत्रिंशदधिक-नशतोत्तरैकसप्तसहस्राधिक-त्रयोविंशतिलक्षं छात्राः उपस्थिताः आसन् ।एतेषु त्रिनवत्यधिक-दशमलव-षट्षष्टि-प्रतिशतं छात्राः उत्तीर्णाः अभवन् । अस्यां परीक्षायामपि छात्राभिः सर्वाधिकाः पञ्चनवति-प्रतिशतम् अङ्काः सम्प्राप्ताः । प्रधानमन्त्री नरेन्द्रमोदी दशम-द्वादश-कक्षयोः समुत्तीर्णेभ्यः छात्रेभ्यः वर्धापनं प्रायच्छत् ।

## वायुसेवानिरस्तीकरणम्

एयर् इण्डिया द्वारा उक्तं यत् वर्तमानपरिस्थितीः अभिलक्ष्य तथा च यात्रिणां सुरक्षां मनसि निध्याय जम्मू-लेह-जोधपुर-अमृतसर-भुज-जामनगर-चण्डीगढ-राजकोटान् प्रति ततश्च सर्वाः विमानसेवाः स्थगिताः स्थास्यन्ति। एकस्मिन् सामाजिकतन्त्रसन्देशे विमानसेवासमवायद्वारा लिखितं यद् एषः परिस्थितीः सम्यक्तया निरीक्षयन् अस्ति यात्रिणः च यथासमयं सूचयिष्यति । इण्डिगोवायुसेवासमवायेनापि जम्मू-लेह-अमृतसर-चण्डीगढ-राजकोटान् प्रति ततश्च सर्वाः निरस्तीकृताः । दिल्लीवायुयानस्थानके सेवासञ्चालनं सामान्यतया एव प्रचलिष्यति।

## तिरङ्गायात्रा

भारतीयसैन्यस्य ‘सिन्दूराभियानान्तर्गतं’ पाकिस्तानं विरुध्य साफल्यस्य आराष्ट्रे प्रचारप्रसाराभ्यां एकादशदिवसात्मकम् अभियानम् अद्य समारब्धम् ।इदम् अभियानं तिरङ्गायात्रेति नाम्ना सर्वैः परिचेष्यते। सेवानिवृत्ताधिकारिणः सामाजिककार्यकर्तारः सामाजिकसंस्थाः तथा च भाजपादलस्य प्रमुखनेतारः अस्मिन् कार्यक्रमे सहभागितां करिष्यन्ति। एतदभियानं त्रयोविंशतिः दिनाङ्कं यावत् प्रचलिष्यति।

## मुख्यन्यायाधीशसेवानिवृत्तिः

भारतस्य मुख्यन्यायाधीशः संजीव खन्ना अद्य सेवानिवृत्तः । अनेन सह सर्वोच्चन्यायालयस्य एकपञ्चाशत्तम- मुख्यन्यायाधीशत्वेन तस्य कार्यकालः समाप्तिम् उपगतः। सः गतवर्षस्य नवम्बर्-मासस्य दशमे दिनाङ्के कार्यभारं गृहीतवान्, षण्मासान् यावत् भारतस्य मुख्यन्यायाधीशत्वेन श्रीखन्ना कार्यं कृतवान् । न्यायमूर्तिः श्रीखन्ना न्यायाधीशभूषणरामकृष्णगवई इत्यस्य नाम स्वस्य उत्तराधिकारित्वेन औपचारिकरूपेण अनुशंसितवान्।

**।। इति वार्ताः ।।**